# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-१ (SEM-1) | प्रश्नपत्र-५ | गुणा: - ७० |
| विषय:- पौरोहित्यम् | CC 111 | समय: - ०३ त: ०६ |
| दिनाङ्क: - ०९-१२-२०१६ | सन्दर्भग्रन्थ: - याज्ञवल्क्यस्मृति: | |

॥ प्रथमान्विति: ॥

**प्र-१ अधस्तनेषु द्वयो: श्लोकयो: ससन्दर्भं व्याख्या विधेया ।** **०८**

१. देशे काल उपायेन श्रद्धासमन्वितम् ।
पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ॥

२. उपनीय गुरु: शिष्यं महाव्याहृतिपूर्वकम् ।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥

३. अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ॥

**प्र-२ एकस्मिन् विषये विस्तरेण लिखत ।** **०८**

१. ब्रह्मचारिणो नियमान् सविस्तरं वर्णयत ।

२. स्त्रीधर्मान् ग्रन्थोक्तरीत्या वर्णनं कुरुत ।

**प्र-३ प्रदत्तेषु द्वयो: टिप्पणीं लिखत ।** **०४**

१. धर्मस्य ज्ञापकहेतव: ।

२. आचमनप्रकार: ।

३. गुर्वादिलक्षणम् ।

४. प्राजापत्यविवाहलक्षणम् ।

**प्र-४ निम्नलिखितेषु केषाञ्चन पञ्चानां लघूत्तरं लेख्यम् ।** **०५**

१. क्षत्रियाणम् उपनयनकाल: क: ?

२. ऋत्विक् क: कथ्यते ?

३. विविहा: कति: विधा ?

४. ब्राह्मणात् क्षत्रियायां विन्नायाम् उत्पन्नस्य पुत्रस्य नाम किम् ?

५. सापिण्डयं कदा निवर्तते ?

६. के द्विजा: ?

७. ब्राह्मणस्य उपनयनकालस्य परमावधि: क: ?

॥ द्वितीयान्विति: ॥

**प्र-५ अधोलिखितेषु द्वौ श्लोकौ सप्रसंङ्गौ व्याख्येयौ ।** **०८**

१. उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये ।
स्नात्वा देवान्पितृंश्चैव तर्पयेदर्चयेत्तथा ॥

२. न संशयं प्रपद्येत नाकस्मादप्रियं वदेत् ।
नाहितं नानृतं चैव न स्तेन: स्यान्न वार्धुषी ॥

३. सर्वस्य प्रभवो विप्रा: श्रुताध्ययनशीलिन: ।
तेभ्य: क्रियापरा: श्रेष्ठास्तेभ्योऽव्यध्यात्मवित्तमा: ॥

**प्र-६ कमपि विषयमेकमवलम्ब्य निबन्धो लेख्यः ।** **०८**

१. गृहस्थधर्मः ।

२. चतुर्वर्णानां कर्माणि ।

**प्र-७ द्वे टिप्पण्यौ लेखनीये ।** **०४**

१. उत्सर्जनकालः ।

२. अनध्यायकालः ।

३. गोदानफलम् ।

४. प्रतिग्रहनिवृत्तेरपवादः ।

**प्र-८ प्रदतेषु पञ्च प्रश्नाः समाधेयाः ।** **०५**

१. श्रोतकर्माणि कस्मिन् अग्नौ कर्तव्यानि ?

२. योगक्षेमार्थसिद्धये कुत्र गन्तव्यम् ?

३. के पञ्चमहायज्ञाः ?

४. आत्मनो हितम् कदा चिन्तयेत् ?

५. कर्मणा मनसावाचा किं समाचरेत् ?

६. ब्रह्मा ब्रह्माणान् कथम् असृजत् ?

७. सस्नेहपात्राणां शुद्धिः केन भवति ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः श्लोकयोः ससन्दर्भं व्याख्यां कुरुत ।** **०८**

१. कर्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निर्ब्रह्मचारिणः ।
पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसम्पदः ॥

२. श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृष्टयायुः पुष्टिकामो वा तथैवाऽभिचरन्नपि ॥

३. स मन्त्रिणः प्रकुर्वीत प्राज्ञान्मौलान्स्थिराञ्शुचीन् ।
तैः सार्धं चिन्तयेद्राज्यं विप्रेणाथ ततः स्वयम् ॥

**प्र-१० कस्याप्येकस्य प्रकरणस्य सारांशो लेखनीयः ।** **०८**

१. श्राद्धप्रकरणम् ।

२. राजधर्मप्रकरणम् ।

**प्र-११ टिप्पणीमेकां लिखत ।** **०२**

१. एकोदिष्टकालः ।

२. अक्षय्योदकदानम् ।

**प्र-१२ द्वयोः लघूत्तरं देयम् ।** **०२**

१. याज्ञवल्क्यस्मृतौ कति अध्यायाः ? के च ते ?

२. आचाराध्याये कति प्रकरणानि ?

३. चन्द्रस्य समिधः नाम किम् ?

४. शमी कस्य ग्रहस्य समिधस्ति ?